# Rishikashyapaproktam Shivalingarchanopadesham

# ઋષિકશ્યપપ્રોક્તં શિવલિઙ્ગાર્ચનોપદેશમ્

## Document Information

Text title : Rishikashyapaproktam Shivalingarchanopadesham

File name : RRiShikashyapaproktaMshivalingArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 8 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં શિવલિઙ્ગાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
કશ્યપઃ (ઉવાચ)
બિલ્વપત્રૈઃ પ્રસૂનૈર્વા ત્રિવારં સકૃદેવ વા ।
મૃલ્લિઙ્ગે રસલિઙ્ગે વા ધાતુજે નાર્મદેઽપિ વા ॥ ૨૦॥

રત્નલિઙ્ગેષુ વા સમ્યક્સ્થાવરે વા ચરેઽપિ વા ।
સ્વાયમ્ભુવે વા દૈવે વાપ્યર્ષે વા માનવૈઃ કૃતે ॥ ૨૧॥

ઉત્તરોત્તરતોત્કર્ષાત્પૂજનીયઃ સદાશિવઃ ।
લિઙ્ગેષ્વેતેષુ ભક્ત્યૈવ નિયમાચ્છઙ્કરાર્ચકઃ ॥ ૨૨॥

સ્ફાટિકે પૂજિતઃ શમ્ભુઃ પ્રદદાતિ ચ વાઞ્છિતમ્ ।
લિઙ્ગાર્ચનેન સકલં વાઞ્છિતં પ્રાપ્યતે નૃભિઃ ॥ ૨૩॥

સર્વે લિઙ્ગાર્ચનેનૈવ પ્રાપ્યન્તે હિ મનોરથાઃ ।
શિવસ્ય લિઙ્ગપૂજૈવ મુક્તિદા શ્રુતિદર્શિતા ॥ ૨૪॥

આમનન્ત્યણ્ડજશ્રેષ્ઠ જાબાલશ્રુતયો ધ્રુવમ્ ।
શિવલિઙ્ગમનભ્યર્ચ્ય ન પેયં જલમપ્યણુ ॥ ૨૫॥

ફલં વા યદ્યદા ભોજ્યમન્નં વા શઙ્કરાર્પિતમ્ ।
ભુઞ્જીયાચ્છ્રીમહેશાય યન્નિવેદિતમુત્તમમ્ ॥ ૨૬॥

અનભ્યર્ચ્ય મહાદેવં યોઽશ્નીયત્ફલમમ્બુ વા ।
સ પાપી નરકે ઘોરે તિષ્ઠત્યાભૂતસમ્પ્લવમ્ ॥ ૨૭॥

યદ્યદજ્ઞાચ્ચરેત્પાપં યચ્ચ તાપત્રયાત્મકમ્ ।
તદજ્ઞાત્પ્રતિમુચ્યેત શિવલિઙ્ગાર્ચનેન હિ ॥ ૨૮॥

પ્રદોષે યઃ શિવં દૃષ્ટ્વા પરિપૂજ્ય સ મુક્તિભાક્ ।
(પ્રદોષે યઃ શિવં દૃષ્ટ્વા પૂજયેત્સ વિમુક્તિભાક્ ।)

દ્વિત્રૈર્વા બિલ્વપત્રૈર્વા નીરૈર્વાપિ મહેશ્વરમ્ ॥ ૨૯॥

સોમવારે તથા સાયં શતજન્મઘનાશનમ્ ।
કાલાષ્ટમ્યાં કાલકાલં સાયમભ્યર્ચ્ય શઙ્કરમ્ ॥ ૩૦॥

ભૂતાયાં વૈ ભૂતનાથં સાયમભ્યર્ચ્ય શઙ્કરમ્ ।
નૈવેદ્યં નિશિ ભુક્ત્વૈવ સર્વથા ગણપો ભવેત્ ॥ ૩૧॥

સંસારરોગનિર્મુક્તો મુક્તયે કલ્પતે નરઃ ।
તથા પર્વસ્વપિ શિવં ગ્રહણે સોમસૂર્યયોઃ ॥ ૩૨॥

સમભ્યર્ચ્યામરશ્રેષ્ઠં સર્વકાલેષ્વપિ ધ્રુવમ્ ।
યાવજ્જીવં સમભ્યર્ચ્ય જીવન્મુક્તો ભવેન્નરઃ ॥ ૩૩॥

પ્રમાદાદેકદા ત્યક્ત્વા શિવલિઙ્ગાર્ચનં સુત ।
વાપયિત્વા શિરઃ કેશાન્ પ્રાશ્ય ગવ્યાદિપઞ્ચકમ્ ॥ ૩૪॥

રુદ્રૈર્હોમં હુનેદેવં ચરુણા સર્પિષા દ્વિજઃ ।
સ્વસૂત્રોક્તેન માર્ગેણ કૃત્વા પૂર્વાપરક્રમમ્ ॥ ૩૫॥

શામ્ભવં ભોજયિત્વૈકમુપોષ્યાભ્યર્ચ્ય શૂલિનમ્ ।
પૂર્વાહારપરહે ચૈવ કૃત્વા પૂજેદયં પુનઃ ॥ ૩૬॥

ભુઞ્જીત શામ્ભવૈઃ સાર્ધં નૈવેદ્યં યચ્છિવાર્પિતમ્ ।
તત્પાપમુક્તો ભવતિ ઇત્યાહ પરમેશ્વરઃ ॥ ૩૭॥

તસ્માદતન્દ્રિતો લિઙ્ગે પૂજનીયઃ સદાશિવઃ ।
શિવપ્રસાદજનકં શિવલિઙ્ગસ્ય પૂજનમ્ ॥ ૪૨॥

ભુક્તિદં મુક્તિદં ચાપિ જ્ઞાનદં સર્વદા નૃણામ્ ।
અવશ્યં તદ્ દ્વિજાતીનામિત્યાહ શશિશેખરઃ ॥ ૪૩॥

તસ્માત્સમ્પૂજયેત્સામ્બં લિઙ્ગમેવ પિનાકિનઃ ।
શિવલિઙ્ગાર્ચનેનૈવ શિવસ્તુષ્યતિ નાન્યથા ॥ ૪૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં શિવલિઙ્ગાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૮ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 8 . vAvRRittashlokAH ..

Notes:
Ṛṣi Kaśyapa ઋષિ કશ્યપ delivers Upadeśa ઉપદેશ (to Pataṅga પતઙ્ગ) about worship of Śivaliṅga શિવલિઙ્ગ. He especially mentions about worship during Pradoṣa પ્રદોષ, Somavāra સોમવાર, Sayaṅkāla સાયઙ્કાલ, Kālāṣṭamī કાલાષ્ટમી.

Proofread by Ruma Dewan

---

*Rishikashyapaproktam Shivalingarchanopadesham*
pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*